# Lakshmiprokta Shivakshetramahima

# लक्ष्मीप्रोक्ता शिवक्षेत्रमहिमा

## Document Information

Text title : Lakshmiprokta Shivakshetramahima

File name : lakShmIproktAshivakShetramahimA.itx

Category : shiva, shivarahasya, lakShmI, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 24| 51-57||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# लक्ष्मीप्रोक्ता शिवक्षेत्रमहिमा

(शिवरहस्यान्तर्गते उग्राख्ये)
शिवक्षेत्रनिवासेन जायते पापसङ्क्षयः ।
पुण्यवृद्धिश्च भवति शिवक्षेत्रे शिवार्चनात् ॥ ५१ ॥

दुर्लभं तन् शिवक्षेत्रं शिवभक्तिश्च दुर्लभा ।
शिवक्षेत्रनिवासोऽपि दुर्लभो मुक्तिदायकः ॥ ५२ ॥

पुण्यवृद्धिकरं श्रेष्ठं शिवक्षेत्रे शिवार्चनम् ।
तद्भूरिपुण्यतपसा लभ्यते नात्र संशयः ॥ ५३ ॥

यः करोति शिवक्षेत्रे शिवलिङ्गार्चननं मुदा ।
स धन्य इति विज्ञेयः श्रेष्ठो जनिमतां नृणाम ॥ ५४ ॥

शिवैकरतचित्तानां शिवक्षेत्रनिवासिनाम् ।
महद्भाग्यं महद्भाग्यं भाग्यस्यान्तो न विद्यते ॥ ५५ ॥

विष्णुत्वस्थैर्य सिध्यर्थं पुनः पुरपीश्वरम् ।
पूजयस्वातियत्नेन शिवक्षेत्रे यथाविधि ॥ ५६ ॥

शिवैकशरणो भूत्वा शिवक्षेत्रे शिवं यज ।
शिवक्षेत्रे कृता पूजा यतोऽनन्तफलप्रदा ॥ ५७ ॥

॥ इति शिवरहस्यान्तर्गते लक्ष्मीप्रोक्ता शिवक्षेत्रमहिमा सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २४। ५१-५७॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 24 . 51-57..

Proofread by Ruma Dewan

*Lakshmiprokta Shivakshetramahima*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*